ति संयोगजसंयोगः स्पर्शः तृतीयः स्यादिति सर्वेषामन्वितः आदिमः अभिघातः द्वितीयो नोदनाख्यः संयोग इति विभक्तप्रत्ययासाधारणं कारणं
विभागं तन्निरूपयति विभाग इति विभागोपि त्रिधा भवेत् एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत् हे
तुमात्रविभागोत्थो हेत्वहेतुविभागजः एककर्मेति तदुदाहरणं तु श्येनशैलविभागादि कर्पूरमल्लयोर्द्वितीयः तृतीयोपि विभागजः कारणमात्रविभा
गजोऽन्यः कारणाकारणविभागजन्यश्चेति आद्यस्तावत् यत्र कपाले कर्म ततः कपालद्वयविभागः ततो घटारंभकसंयोगनाशस्ततो घटनाशः
तेनैव कपालविभागेन सकर्मणः कपालस्य आकाशविभागो जन्यते ततः आकाशसंयोगनाशः ततः उत्तरदेशसंयोगः ततः कर्मनाश इति न तु
तत्कर्मणैव कथं देशांतरविभागो जन्यत इति वाच्यं एकस्य कर्मणः आरंभकसंयोगप्रतिद्वंद्विविभागजनकत्वस्य अनारंभकसंयोगप्रतिद्वंद्वि वि
भागजनकत्वविरोधात् अन्यथा विक — कुसुमभंगप्रसंगात् तस्मात् द्वितीयकमनारंभकसंयोगप्रतिद्वंद्विविभागजनने तदा रंभकसंयोगप्रति

पि २ *ति ४*

वयवत्वाच्छरीरादावयवयोगवत् असमवायिकारणनाशस्यावयवकत्वादवयवविनाश आवश्यकः न च पटविनाशेऽपि तन्त्वन्तरसंयोगा
त्परिमाणोत्कर्षः कस्मात् इति वाच्यं तत्रापि नैमात्त्वभिन्नात्तन्नाससमवायिकारणतन्तुसंयोगनाशस्य पटनाशस्यावश्यकत्वात् किं च तन्त्वन्तर
स्य तत्पटावयवत्वे पूर्वं न तत्पट एव न स्यात् तत्तन्तुरूपकारणाभावात् तन्त्वन्तरस्यावयवत्वाभावे च न तेन परिमाणाधिक्यं संयुक्तद्रव्या
न्तरवत् तस्मात्तत्र तन्त्वन्तरसंयोगे सति पूर्वपटनाशस्ततः पटान्तरोत्पत्तिरिति एवं च स्वीकार्यं अवयविनः प्रत्यभिज्ञानं तु साजात्येन दीप
कलिकादिवत् न च पूर्वतन्तुना एव तन्त्वन्तरसहकारात् पूर्वपटे सत्येव मलोत्तरमारंभणमिति वाच्यं मूर्तयोः समानदेशताविरोधात् तत्र पटद्वया
पि ६ संभवात् एकदा नानाद्रव्यस्य तत्रापत्तेः भवान्न चात्र पूर्वद्रव्यस्य प्रतिबंधकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यस्यावश्यमभ्युपेयत्वात् पृथक्त्वं
निरूपयति संख्यावत्तु पृथक्त्वं स्यात् पृथक्त्वस्य अन्यथा साधारण्यं कारणं पृथक्त्वं तन्नित्यतादिकं संख्यावत् तथाहि नित्येषु
कत्वं नित्यं अनित्येषु अनित्यमेकत्वं तु आश्रयद्वितीयक्षणोत्पद्यते आश्रयनाशान्नश्यति तथैकपृथक्त्वमपि
लादिवच्च द्विपृथक्त्वादिकमपीत्यर्थः ननु अयमस्मात्पृथक् इत्यादावन्योन्याभावो भासते तत्कथं पृथ
क्त्वं गुणान्तरं स्वीक्रियते न चास्तु पृथक्त्वं न त्वन्योन्याभाव इति वाच्यं रूपं न घट इति प्रतीत्यनापत्तेः न हि पटे घटावधिकं पृथक्त्वं गुणान्तरमस्ति न वा
घटे घटावधिकं पृथक्त्वमस्ति यत्र परासंबंधः कल्प्य तत्राह अन्योन्याभावेनान्यथासिद्धिरिति नार्थं त्वमिष्यते अस्मात्पृथगिदं नेति मतौ

स. मु. ली.

५४

यां बुद्धिं निरूपयति बुद्धेः भेदं चः प्रागेव प्रायशो विनिरूपितः अथावशिष्टोऽप्यपर प्रकारः परिरूप्यते अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्य
ते तत्र अप्रमां निरूपयति तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता तदभाववति तत्प्रकारकं ज्ञानं अप्रमेत्यर्थः तत्रापि भेदौ विपर्यासः संशयो
पि प्रकीर्तितः तत्र प्रपंचः अप्रमा प्रपंचः आद्यो देहेष्वात्मबुद्धिः शंखादौ पीततामतिः भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते इति आद्य विपर्या
स इत्यर्थः शरीरादौ निश्चयस्य परात्मत्व प्रकारं ज्ञानं गौरोऽहमित्याकारकं एवं शंखादौ पीतः शंखस्याकारकं यज्ज्ञानं निश्चयरूपं तद्भ्रम इति किंस्वि
न्नरो वा स्थाणुर्वेत्यादि बुद्धिस्तु संशयः किंस्विदिति वितर्के निश्चयलक्षणमाह तदभावाप्रकारधीः तत्प्रकारा तु निश्चयः तदभावाप्रकारकं तत्प्रकार
कं ज्ञानं निश्चयः संशयं लक्षयति सं शयो मतिर्या स्यैकत्र भावाभावयोः एकधर्मिक विरुद्ध भावाभाव प्रकारकं ज्ञानं संशय इत्यर्थः साधारणादि

17

धर्मस्य ज्ञानं संशयकारणं उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणं यथा उच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वा स्थाणुर्नवेति संदिग्धे एव ।
मसाधारणधर्मज्ञानं संशयकारणं यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दे गृहीत्वा शब्दो नित्यो न वेति संदिग्धे विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिश
ब्दात्मिका न संशयकारणं शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वाभाव्यात् किंतु तत्र शब्देन कोटिद्वयज्ञानं जन्यते संशयस्तु मानस इति एवं
ज्ञाने प्रामाण्यसंशयादि विषयसंशय इति एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यं किंतु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमि
ति दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् अप्रमां प्रति दोषाः कारणं प्रमां प्रति गुणः कारणं अत्रापि पित्तादि रूपा दोषा अननुगताः तेषां कार

कं हि विभागं न जनयेत् कारणाकारणविभागेनैव तदुत्पत्त्यभावात् एवं कुड्यादिदेशान्तरविभागानजन्यत्वमपि वाच्यं आरंभकसंयोगप्रतिद्वंद्विविभागवतोऽव
यवस्य सत्क्रिये देशान्तरविभागासंभवात् द्वितीयस्तावत् यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च शरीर
तरुविभागे हस्तक्रिया न कारणं व्यधिकरणत्वात् शरीरे तु क्रिया नास्त्येव अवयवविकर्मणो यावद्द्रव्यकर्मनिमित्तत्वात् अतस्तत्र कारणाका
रणविभागेन कार्याकार्यविभागो जन्यत इति अत एव विभागो गुणान्तरं अन्यथा शरीरे विभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो
नान्यथासिद्धो भवति परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति परत्वं चापरत्वं च द्विविधं प्रकीर्तितं दैशिकं कालिकं चापि तत्रैव तु
दैशिकम् परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् अपरं तदल्पत्वबुद्धितः स्यादितीरितं दैशिकं परत्वं च बहुतरमूर्तसंयोगान्तरितत्वज्ञाना
दुत्पद्यते एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते अत्रावधिलाघवापेक्षा यथा पाटलिपुत्रात्काशीमपेक्ष्य प्रयागः परः पाटलिपुत्रात्कु
रुक्षेत्रमपेक्ष्य प्रयागोऽपर इति नयोः परत्वमवाप्येतु दिक्संयोगस्तदाश्रये तयोर्दैशिकपरत्वापरत्वयोः [illegible] असमवायीकारणं तदाश्रय
दैशिकपरत्वापरत्वाश्रये दिवाकरपरिस्पंदभूयस्त्वज्ञानतो भवेत् परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः अत्र च समवायीस्तु संयोगः कालपिंड
योर्दिवाकरेति अत्र परत्वापरत्वे च कालिके ज्ञेये यस्य सूर्यपरिस्पंदापेक्षया यस्य सूर्यपरिस्पंदोऽधिकः स ज्येष्ठः यस्य न्यूनः स कनिष्ठः कालि
कपरत्वापरत्वे जन्यत एव अत्र कालिकपरत्वापरत्वयोः अपेक्षाबुद्धिनाशाच्च नाशः [illegible] तेषां कालिकदैशिकपरत्वापरत्वानां क्रमशः

सि॰ मु॰ टी॰

५५

ज्ञानेऽग्रहणमात्रान्निःक्षज्ञानत्वादिभ्रमत्वाभावाद्... ज्ञानेन ... ज्ञानमिति ...
भावः ६ ...

माणांतरत्वस्यापीति चेन्न यथार्थानुभवकरणत्वेन प्रमाणत्वं विवक्षितत्वात् इदं तु बोध्यं येन संबंधेन यद्वत्तातेन संबंधेन तद्विशेष्यक[illegible]कत्वं
तत्प्रकारकत्वं वाच्यं तेन कपालादौ संयोगादिना घटादिज्ञानेनातिव्याप्तिः एवं सति निर्विकल्पके प्रमानस्यात् तस्य सप्रकारकत्वाभावादन्याप्तेः तु
प्रमाणापि भ्रमः ... निर्विकल्पकं प्रकारकतादिशून्यं हि संबंधानवगाहित्वात् ननु वृक्षे कपिसंयोगज्ञाने भ्रमः प्रमा च स्यादिति चेन्न प्रतियोगिव्यधिकर
णसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् न च वृक्षे कपिसंयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानं भ्रमो न स्यात् तत्र संयोगाभावस्य प्रतियो
गिसमानाधिकरणत्वादिति वाच्यं तत्र संयोगाभावावच्छेदकावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् लक्षणस्याननुगमात् लक्षणाननुगमेन क्षतिः प्र
मात्वं न स्वतो ग्राह्यं संशयानुपपत्तेः मीमांसका हि प्रमात्वं स्वतो ग्राह्यमिति वदन्ति गुरुमते ज्ञानस्य स्वतः प्रकाशरूपत्वात् ज्ञानप्रकाशेऽपि तेने
व गृह्यते इति भट्टानां मते ज्ञानमतीन्द्रियं ज्ञानजन्या ज्ञाततास्ति तया च ज्ञानमनुमीयते मुरारिमिश्राणां मते तु अनुव्यवसायेन ज्ञानं गृह्यते तेषां सर्वेषामपि मते
तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते विषयनिरूप्यं हि ज्ञानं अतो ज्ञानवित्तिवेद्यो विषयः ज्ञानस्य वित्तिज्ञानमनुव्यवसायः तथा च सति
घटविशेष्यकत्वकृतानामपज्ञे विशेष्ये घटत्ववैशिष्ट्यस्य गृहीतत्वात् घटविशेष्यकत्वग्रहे बाधकाभावादिति तन्मतं दूषयति न स्वतो ग्राह्यमिति सं
शयेति यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यं स्यात्तदानभ्यासदशायां ज्ञाने प्रामाण्यसंशयो न स्यात् तत्र हि यदि ज्ञानं ज्ञातं तदा त्वन्मते प्रामाण्यं ज्ञातमेवेति क
थं संशयः यदि तु ज्ञानं तदा धर्मिज्ञानाभावात्कथं संशयस्तस्माज्ज्ञाने प्रामाण्यमनुमेयं तथाहि इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं

तथा चेति इदं ज्ञानं ... प्रकारक ... प्रकारक ज्ञानं ... फलितार्थः ... प्रकारकत्वे सति ...
साध्या यथार्थ ... प्रकारि ज्ञानं ... तथा च ज्ञाने ग्रहणमात्रेण तत्र ... प्रकारकत्वं ... तत्प्रामाण्यमनुमेयम्

प्रा २
ज्ञानं २
18
५५

णत्वं अन्वयव्यतिरेकाभ्यां सिद्धं गुणस्य प्रमाजनकत्वं त्वनुमानात्तथाहि यथार्थज्ञानं [illegible] कं शरीरभिन्नकारणजन्या अन्यज्ञानत्वात् अप्रमावत् न
च दोषाभाव एव कारणमस्त्विति वाच्यं पीतः शंख इति ज्ञानस्य दोषेपि चक्षुरादिदोषसत्त्वात् चैत्रस्य प्रमानुत्पत्तिप्रसंगात् विनिगमनाविरहान्नन्तद्दोषा
भावकारणत्वमपेक्ष्य गुणकारणतायां लाघवात् न च गुणसत्त्वेपि तत्र प्रतिबंधकं दोषस्य तत्र भवत्यप्रमा न मतः पित्तादिदोषाभावानां कारणत्वमवश्यं
वाच्यं तथा च किं गुणस्य हेतुत्वकल्पनेनेति वाच्यं तथाप्यन्वयव्यतिरेकाभ्यां गुणस्यापि हेतुत्वसिद्धेः एवं भ्रमं प्रति गुणाभावकारणमित्यस्यापि स्
वचत्वात् तत्र दोषाणामेकैकस्य कार्यतामाह पित्तदूरत्वादिरूपो दोषो नानाविधो मतः क्वचित्पीतादेर्भ्रमे पित्तं दोषः क्वचिच्चंद्रादेः स्वल्पपरिमाण
भ्रमे दूरत्वं दोषः क्वचिद्वंशे उरगभ्रमे मंडूकवसांजनमित्येवंरूपदोषा अन [illegible] नंताः एवं भ्रांतिजनकाः स्युर्यथा अथ [illegible] गुणान्ताकांक्षायां प्रत्यक्षा
दौ क्रमेण गुणान्दर्शयति प्रत्यक्षे तु विशेष्येण विशेषणवता समं सन्निकर्षो गुणः स्यादथ त्वनुमितौ पुनः पक्षे साध्यविशिष्टे हेतुप [illegible] परामर्शो गुणो २।६
भवेत् प्रत्यक्षे इति प्रत्यक्षे विशेष्यावच्छिन्नविशेषणसंनिकर्षो गुणः अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः एवमग्रेपि ज्ञेयं [illegible] साद् कै१
श्यबुद्धिस्तूपमितौ गुणाः शाब्दबोधे योग्यतायास्तु निश्चयो यथार्थः सा प्रमा गुणः स्यात् प्रमा निरूप्यते अथ भ्रमे नेनु तन्मदोषोऽयं तु प्रमा न त्वय
थार्थे रजतयोर्भेदेऽग्रहे इदं रजतमिति ज्ञाने तद्रजतत्वेऽपि प्रमात्वं स्यात् ज्ञानस्य भ्रमभिन्नत्वाभावात् अत आह अथवा तत्प्रकारं यज्ज्ञानं तद्वद्
विशेष्यकं [illegible] तद्विशेष्यकत्वावच्छिन्नतत्प्रकारकज्ञानं प्रमेत्यर्थः अथ यथार्थस्य प्रमात्वं स्यात् ततः किमिति चेत् प्रमात्वस्य तत्कारणस्यापि प्र

जय हिं सं.
सि. मु. जी.

व्याप्यधूमाज्ज्ञानमनुमितिरित्यनुशेपाद्यायपतितं तं संपन्नमयतः प्राग्भाजुः ह्स्यां चान्यप्राख्यातौ प्रत्यक्षमेव प्रमाणं रंगं रजतं तथाऽस्त्वेव दर्शनमित्य
नुभवादिति संक्षेपः पूर्वं व्याप्तिर्ज्ञानं दुष्टमाय स्तुनदर्शितः स्पतस्तं दृश्यं यत्तिव्यभिचारस्याग्रहो यः सहचारग्रहस्तथा तु व्याप्तिग्रहेत
वे:तु चिच्छंकानिवर्त्तकः व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः व्यभिचाराग्रहस्य व्याप्तिग्रहे प्रतिबंधकत्वात्तदभावः
कारणं एवमन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुत्वाभ्युपगमे तु न कारणं व्यभिचारास्फूर्तौ सकृद्दर्शनेपि व्याप्तिग्रहात् क्वचिद्व्य
भिचारशंकाविधूननद्वारा भूयोदर्शनमुपयुज्यते यत्र तु भूयोदर्शनादपि शंका नापैति तत्र विपक्षे बाधकतर्कोऽपेक्षितः तथाहि वह्निवि
रहितोऽपि धूमः स्यादिति पश्चाच्छंका भवतीति तदा वह्निधूमयोः कार्यकारणभावस्य प्रतिसंधानान्निवर्त्तते यद्ययं वह्निमान्न स्यात्तदा धूमवान्न
स्यात् कारणं विना कार्यानुपपत्तेः यदि च क्वचित्कारणं विनापि कार्यं भविष्यति अहेतुक एव भविष्यतीति तत्र शंका भवेत् तदा स्वा
व्याघातादपसारणीया यदि कारणं विना कार्यं स्यात्तदा धूमार्थं वह्नेस्तृप्त्यर्थं भोजनस्य नियमतः उपादानं नैव स्यादिति यत्र स्वत एव
शंका नावतरति तत्र न तर्कापेक्षापीति तदिदमुक्तं तर्कः क्वचिच्छंकानिवर्त्तक इति इदानीं परकीयव्याप्तिग्रहप्रतिबंधार्थमुपाधिं निरूप
यितुमाह साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते साध्यत्वाभिमतव्यापकत्वे सति साधनत्वा
भिमताव्यापकत्वमुपाधिरित्यर्थः नन्वयं श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वं नोपाधिः स्यात्तस्य साध्यव्यापकत्वाभावात् श्यामत्व

यथा सुरभि इदं पृथिवीत्वप्रकारकं ज्ञानं सुरभिगंधवति पृथिवीत्वप्रकारकज्ञानत्वात् एवमिदं जलत्वप्रकारकं ज्ञानं भ्रमस्नेहवति जलत्वप्रकारकज्ञा-
नत्वात् न न हेतुज्ञानं कथं ज्ञानमिति वाच्यं पृथिवीत्वप्रकारकत्वस्य स्वतोग्राह्यत्वात् तत्र गंधग्राहकेण गंधवद्विशेष्यकत्वस्यापि सुग्रहत्वात् तत्प्रकार-
कत्वावच्छिन्नतद्विशेष्यकत्वपरं न गृह्यतेति संशयानुरोधात् ननु सर्वेषां ज्ञानानां यथार्थत्वात् भ्रमालक्षणात् तद्विशेष्यकत्वं विप्रावर्णं व्यर्थं न च रंगे
रजतार्थिनः प्रवृत्तिर्भ्रमजन्यान्यथाख्यातिमते भ्रमस्याभावादिति वाच्यं तत्राहियथा धीनत्वमुरीक्रियते निस्वतंत्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् तत्र
रजतस्थले तु विशिष्टज्ञानस्य सत्त्वात् तदेव कारणं असत्त्वात् तत्रापि रजतभेदाग्रहस्य कारणमिति चाख्यातिः संभवति रजतमन्यत्र कारणस्य
रजतसन्निकर्षस्याभावात् रंगे रजतत्वबुद्धेरनुपपत्तेरिति चेन्न सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः क्लृप्तत्वात् अन्यत्रापि तत्कल्पना-
त् न च संवादिप्रवृत्तौ तत्कारणं विसंवादिप्रवृत्तौ भेदाग्रहः कारणमिति वाच्यं लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात् किं च रंगे रजतत्ववि-
शिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणाप्रत्यासत्तिकल्पनेऽपि न क्षतिः फलमुखगौरवस्यादोषत्वात् किं च यत्र रंगरजतयोरिमे रजतरंगे चेति ज्ञानं जा-
यते तत्र न कारणबाधोऽपि अपि च यत्र रंगरजतयोरिमे रजतरंगे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्तिनिवृत्ती स्यातां रंगे रंगाभेदग्रहे रजते रजतभेदग्रहे
चान्यथाख्यातिभयात् अन्यमते रंगे रंगभेदाग्रहस्य रजते रजतभेदाग्रहस्य च दोषादेव रंगे रजतभेदाग्रहस्य रजते रंगाभेदाग्रहस्य सत्त्वात् कि-
चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे [illegible] विशिष्टज्ञानं कारणं तदा पाकोलके वह्नि-

त॰ वह्नत्र
सि॰ मु॰ भी

दृष्टांतसाधनव्यापकोपि केऽप्यादिः यथा ...
दोषान्तसारीति ५ द्वि

५७

धूमवत्ति न्युपाधिव्यभिचारेणसाध्यव्यभिचारानुमानं यथा सत्प्रतिभामित्रात्तनयत्वादित्यादौ मित्रातनयत्वस्य शाकपाकजत्वव्यभिचारीति त्रातनये शाक
पाकजत्वव्यभिचारित्वादिति वा आनुमीतपक्षेतरस्तु साध्यव्यापकतापरिच्छेदकप्रमाणाभावात् स्वव्याघातकत्वाच्चनोपाधिः बाधोन्नीतस्तु यथा
ध्वंसवत्त्वेन पर्यावृत्तिरनुष्णाकृतकत्वादित्यादौ प्रत्यक्षेणाबाधोऽष्मत्वमहेवहीतरत्वं नोपाधिः अनुमापकेः साध्यव्यापकत्वादिकं संदिह्यतेस्तसं
दिग्धोपाधिः पक्षेतरस्तु संदिग्धोपाधिरपि नोद्भावनीयः कथकसंप्रदायानुरोधात् केचित्तु सत्यत्रापि चोत्थापनमुपाधेः फलं तथा हि अयोगोल
कं धूमवत् वह्नेरित्यादौ अयोगोलकं धूमाभाववत् आर्द्रेन्धनाभावादिति सत्प्रतिपक्षसंभवात् स्पर्शवत्त्वेन वाक्यत्वस्य पाशिद्धेरेव दृष्टाणि
कं धूमवत्त्व वह्नेरित्यादौ अयोगोलकं धूमाभाववत् आर्द्रेन्धनाभावादिति सत्प्रतिपक्षसंभवात् ...
ति वाच्यं सर्वत्रोपाधेर्दूषणान्तरसांकर्य त् अत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरिति वदंति शब्दोपमानयोर्नैव पृथक्प्रमाणत्वमिष्य
ते अनुमानगतार्थत्वादिति वैशेषिकमतं वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणं शब्दोपमानयोरनुमानविधयैव प्रामाण्यं स्या
द्वि॰ हि नैयायिकमते प्रत्यक्षादिपदानि वैदिकपदानि वा तात्पर्यविषयस्मारितपदार्थसंसर्गप्रमापूर्वकाणि आकांक्षादिमत्पदकदंबकत्वात् घ
टमानयेतिपदकदंबवत् प्रत्युत्पन्नपदार्थाः मिथः संसर्गवन्तः योग्यतादिमत्पदस्मारितत्वात् तादृशपदार्थवत् दृष्टांते मिथःसंसर्गान्तरेणासा
ध्यसिद्धिरिति एवं गवयव्यक्तिप्रत्यक्षानंतरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकं असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात् असति वृत्त्यन्तरे वृद्धै
स्तत्र प्रयुज्यमानत्वात् यत्र यत्प्रयुज्यते तत्तत्प्रवृत्तिनिमित्तकं यथा गोपदं गोत्वप्रवृत्तिनिमित्तकं महागवयपदं तत्र प्रवृत्तिनिमित्तकं साधुपदत्वादित्यनुमानेन पक्षध

स्य घटासाधनपि सत्त्वात् एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात् प्रत्यक्षत्वस्यात्मादिषु सत्त्वात् तत्र च
रूपाभाववत्त्वे एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात् विनाशित्वस्य प्रागभावे सत्त्वात् तत्र च भावत्वाभावात् इति [illegible]पक्षधर्मा
वच्छिन्नसाध्यव्यापकत्वेन पक्षधर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्यात् मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं एवं पक्ष
धर्मवह्निर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकम् उद्भूतरूपवत्त्वं वह्निर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकत्वं च एवं ध्वंसो विनाशी जन्यत्वा
दित्यत्र जन्यत्वावच्छिन्नसाध्यव्यापकत्वं भावत्वं साध्यनावत्त्वात् अतो धर्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्याव्या
पकं किंचित् स्यात् व्यभिचारिणि तु अन्तत उपाध्यधिकरणं यत्साध्याधिकरणं यत्नोपाधिश्चान्यं साध्यव्यभि[illegible]राधिकरणं तदन्यतरत्वा
वच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेः संभवतीति अत एव लक्षणमपि उपाधिस्वरूपमेतदनुसारेणाद्यं मति स[illegible]
ध्यसमा[illegible]नाधिकरणः स्यात् [illegible] हेतोरेकाश्रययोः साध्यव्यभिचारित्वात् स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारित्वे त्यर्थः उपाधेः [illegible]
कृत्ता बीजमाह व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनं उपाधिव्यभिचारेण हेतौ साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः तत्पाहि यत्र
शुद्धसाध्यव्यापक उपाधिस्तत्र शुद्धेनैवोपाधिव्यभिचारेण साध्यव्यभिचारानुमानं यथा धूमवान् वह्नेरित्यत्रार्द्रेन्धनव्यभिचारी तद्व्यापक
आर्द्रेन्धनव्यभिचारित्वादिति व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात् यत्र तु किंचिद्धर्मावच्छिन्नसाध्यस्य व्यापक उपाधिस्तत्र

प्रतिब[illegible]

सि.मु.ली.

५८

वेगत्वेन तत्राभावाभावाभावेन तद्वत्त्वेनाभावः सिद्ध्यति एवं तादात्म्यसंबंधेन तद्व्यापकत्वं घटाभावस्य घटत्वेन तत्र तादात्म्यसंबंधेन
तस्याभावः सिध्यति एवं अन्योन्याभावः एवं यत्र संयोगसंबंधेन घटप्रतियोगिसंयोगसंबंधेन तद्व्यापकत्वं घटत्वेन तत्र संयोगसंबंधावच्छिन्नप्रतियो
गिताकत्वस्याभावेन जलहृदे संयोगसंबंधावच्छिन्नप्रतियोगिताकघटाभावः सिध्यति अन्वयव्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणं केचि
त्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते न तु व्यतिरेकव्याप्तिज्ञानमपि कारणं यत्र व्यतिरेकसहचाराद्व्याप्तिग्रहस्तत्र व्यतिरेकी तु अनुमानं
साध्यप्रसिद्धिस्तु घटवाद्येन ज्ञापनीया [illegible] पृथिवीत्वान्तेदेन साध्यतरमितरेति अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिति व्यतिरेकव्याप्तिबुद्ध्या

४१

चरितार्थाहि सा यतः अर्थापत्तिः प्रमाणान्तरमिति केचिन्मन्यन्ते तथाहि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीवितेन गृहासत्वेन च
प्रत्यक्षादवगतेत्तत्र शतवर्षजीवित्वेन गृहासत्वेन बहिः सत्त्वं विनानुपपन्नमिति बहिःसत्त्वं कल्प्यत इति तदप्यनुमानेन गतार्थत्वान्न प्रमाणान्तरमिति प
त्रजीवी तिष्ठ्य बहिःसत्त्वा सत्त्वान्यतरव्याप्यत्वेन हीति तत्रान्यतरसिद्धौ [illegible] सत्त्वबाधाद्बहिःसत्त्वमनुमितेः [illegible] एवं पीनो देवद
त्तो दिवा न भुंक्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनसिद्धौ दिवाभोजनबाधेन रात्रिभोजनं सिध्यतीति अनुपलब्धस्यानुभाविक
त्वादनुपलब्धेरपि न प्रमाणान्तरं किं त्वनुपलम्भस्य हेतुत्वेन [illegible] अस्य तज्ज्ञानस्य हेतुत्वेऽपि तु तत्राप्यनुपलम्भान्तरापेक्षत्वे अनवस्थापत्तेश्च
इत्यपि न प्रमाणान्तरं तस्याः संकेतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाच्चेष्टा [illegible] यच्च व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति

वे२

५८

अ

न्वे

मेतावता स्वयल्पज्ञत्वनिमित्तकत्वं सिद्धं तिन्मतत्व यदि तिन्नेनसम्यग्विना व्याप्तिबोधं शब्दादिबोधतः व्याप्तिज्ञानं विनापि शब्दा
दितो बोधस्यापि अनुभवसिद्धत्वात् न हि सर्वत्र शब्द … बाणाने तत्र व्याप्तिज्ञानं प्रमाणमस्तीति किंच सन्नेत्र शब्दस्य लेय दि व्याप्तिज्ञानं स्वत्व
तेन शब्दसर्वत्रानुमितिस्थले परज्ञानं कल्पयितव्या शाब्दबोध एव किं न स्यादित्यत्र यत्तामतिछे ये त्रैविध्यमनुमानस्य केवला … न्वयिव्यतिरेकि भेदैन्तु
भवेद्यो नेरन्वयव्यतिरेकात्: अन्वयव्याप्तिरूपैव व्यतिरेकाद्धि तो नाति साध्याभावव्यापकत्वे तत्त्वभावस्य प्रदूषेत् अनुमानं हि त्रिविधं के
वलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकि भेदात् तत्रासद्विपक्षः केवलान्वयी यथा घटोऽभिधेयः प्रमेयत्वादित्यत्र तत्र हि सर्वस्येवाभिधेयत्वा
द्विपक्षासत्त्वं नानुमेयबोध भोगव्याप्तत्वात् केवलान्वयस्याप्रसिद्धिरिति चेन्न व्याप्तित्वस्य सर्वसाधारणेन सप्तैव केवलान्वयित्वात् किं वा
निमद्वत्तंताभावाप्रतियोगित्वं केवलान्वयित्वं तच्च गगनाभावकपिसंयोगाभावादौ अस्ति इदं असत्सपक्षः केवलव्यतिरेकी यथा पृथिवी इ
तरेभ्यो भिद्यते गंधवत्त्वादित्यत्र हि जलादित्रयोदशभेदस्य पृथिवीमात्रनिष्ठत्वेन तथा निश्चितसाध्यवतः सपक्षस्याभावात् सत्सपक्षविपक्षो
अन्वयव्यतिरेकी यथा वह्निमान् धूमादित्यत्र सपक्षस्य महानसादेर्विपक्षस्य ह्रदादेः असत्त्वादिति ननु हि व्यतिरेकव्याप्तिर्व्यतिरेकव्याप्तिज्ञा
नेकारणं तद्रूपं व्यतिरेकव्याप्तिर्निरुक्ति साध्याभावत्ति साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति चेत् अत्र यं बोध्यं यत्संबंधेन यस्य
च्छिन्नं प्रति व्यापकता गृह्यते तत्संबंधावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति रिदं … वयवेतरत्व व्यापकत्वेन गंधाभावा

यत्संबन्धा वच्छिन्न यद्रूपावच्छिन्नाभावाव्याप्यतानिरूपितव्यापकता ग्रहात्

सि॰ कु॰ सी॰

५८

मित्यर्थः बलवद्द्विष्टसाधनताज्ञानं कारणं तेन नान्तरीयकदुःखजनकपाकादौ न दोषः । फलं निरूपयति प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणं एवं
प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितं प्रवृत्तिनिवृत्तिर्जीवनयोनियत्नभेदात् त्रिविधः प्रयत्न इत्यर्थः । चिकीर्षेति चिकीर्षा कृतिसाध्येष्टसाधनत्वम
तिस्तथा [illegible] र मधुविषसंपृक्तान्नभोजनादौ न बलवद्द्विष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः
कृतिसाध्यताज्ञानादि बलवदनिष्टाननुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति कार्यताज्ञानं प्रवर्तक
मिति गुरवः तथा हि ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नापेक्षितम् लिप्सा च कृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारप्रकार

२२

कधीसाध्यत्वनियमात् चिकीर्षा हि कृतिसाध्यत्वप्रकारकेच्छा न च कृतिसाध्यत्वे प्रकारकप्रकारकं ज्ञानं चिकीर्षायां तस्य च प्रवृत्तौ हेतुः
मिष्टसाधनताज्ञानं तत्र हेतुः कृत्यसाध्येपि चन्द्रमण्डलानयनादौ प्रवृत्त्यापत्तेः कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न तदभावापेक्षया कृति
साध्यत्वज्ञानस्य लघुत्वात् न च द्वयोरपि हेतुत्वं गौरवात् ननु स्वमतेपि मधुविषसंपृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः कार्यताज्ञानस्य स
त्त्वादिति चेन्न स्वविशेषणवत्ताप्रतिसंधानजन्यकार्यताज्ञानस्य प्रवर्तकत्वात् काम्ये हि पाकयागादौ कामनाऽपि विशेषणं न तच्च बलवदनिष्टाननु
बन्धि काम्यसाधनताज्ञानेन कार्यताज्ञानं तत्र प्रवृत्तिः न तत्र भोजनेन प्रवर्तते तदानीं कामनायाः पुरुषविशेषणत्वाभावात् नित्ये च शौचादिकं पु
रुषविशेषणं तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्र प्रवृत्तिः नन्वेतदपेक्षया लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनताविषयककार्यता
बलवदनिष्टाननुबन्धि … [illegible] … कृतिसाध्यताज्ञानायाभ्युपगमे … इति भावः १

५८

सुखं निरूपयति सुखं हि जगतामेकं काम्यं धर्मेण जायते सुखमिति काम्यपदमभिलाषविषयः धर्मेणेति धर्मत्वेन सुखत्वेन कार्यकारणभाव इत्यर्थः दुः
खं निरूपयति अधर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसां अधर्म इति अधर्मत्वेन दुःखत्वेन कार्यकारणभाव इत्यर्थः प्रतिकूलमिति दुःखस्य ज्ञानादेव
सर्वेषां स्वाभाविकद्वेषविषय इत्यर्थः इच्छां निरूपयति निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते इच्छा तदुपाये स्यादिष्टोपायत्वधीर्यदि निर्दुःख
त्वे तदिच्छा फलविषयिणी उपायविषयिणी चेति फलं तु सुखं दुःखाभावश्च तत्र फलेच्छां प्रति फलज्ञानं कारणं अत एव फलं पुरुषार्थः संभ
वति यज्ज्ञाते सत्स्ववृत्तितया यत्स पुरुषार्थ इति तल्लक्षणात् तदिच्छां प्रति इच्छाविषयफलं फलितोऽर्थः उपायेच्छां प्रतीष्टसाधनताज्ञानं का
रणं चिकीर्षां कृतिसाध्यत्वप्रकारकं कार्यमनुमाय भवेत् कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा चिकीर्षा पाकं कृत्या साधयामी
ति तदनुभवात् तत्र हेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् चिकीर्षां प्रति कृतिसाध्यताज्ञानं इष्टसाधनताज्ञानं च कारणं अत एव वृष्ट्यादौ
कृतिसाध्यताज्ञानाभावान्न चिकीर्षा बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकं अतो मधुविषसं
पृक्तान्नभोजने न चिकीर्षा बलवदिष्टः प्रतिबन्धक इत्यन्यैस्तद्धेतुत्वमिति तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते बलवदनिष्टाजनकत्वज्ञानं कारण
मित्यर्थः कृतिसाध्यताज्ञानादिमतः बलवदनिष्टसाधनताज्ञानेऽप्यस्य बलवदनिष्टाजनकत्वज्ञानं विनापि चिकीर्षायां विलम्बत्वाभावात्कस्य
चिन्मत इत्यस्वरसोदर्शितः द्वेषं निरूपयति द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणं दुःखोपायविषयकं द्वेषं प्रति द्विष्टसाधनताज्ञानं कारण

अजेयक्र ल.
सि. नौ

स्वकरणेप्रत्यवायान्‌ त्वमावतारेत्याः २
प्रवृत्तिंप्र तीष्टसाधनत्वादि विधेरोहेतुत्वे ०

रात्रिसत्र [illegible] प्रत्यवायान् [illegible] अनुवृत्ति [illegible] कृति तथा
प्रवृत्तिरात्रौ इत्यपंती [illegible] श्रुति [illegible] मिति ६

१०

कसंचारेप्रवृत्तिः इत्यंचे(उ)यत्तर्कत्वानुरोधाद्विधेरपीष्टसाधनत्वादिकमर्थः इदंच विश्वजितायजेतेत्यादौ यत्र फलं नश्रूयते
तत्रापि स्वर्गः फलं कल्प्यते न त्वहरहः संध्यामुपासीतेत्यादौ इष्टानुपपत्तेः प्रवृत्तिः कथं न चार्थवादिकं ब्रह्मलोकादिकं फलमिति वा
च्यं तत्पासलि काम्यत्वे नित्यत्वहान्यापत्तेः कामनाभावे चाकरणापत्तेः इत्थं च यत्र फलश्रुतिस्तत्रार्थवादमात्रमिति चेन्न ग्रहणश्राद्धादौ
नित्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात् न च कामनाभावे करणानापत्तिः क्रियाकालस्य व्यापकस्य विवक्षितत्वात् कामनासद्भाव
कल्पनात् ननु वेदबोधितकार्यताज्ञानात् प्रवृत्तिः संभवति इष्टसाधनत्वमज्ञापनात् प्राकार्यताज्ञानसह [illegible] पि प्रवृत्तेरसंभवात्
पदपिपूर्वं अपूर्वं फलमिति तद्यपि न कामनाभावे करणानापत्तेः [illegible] स्यात् कामनाकल्पने त्वार्थवादिकं फलमेव रात्रिसत्रन्यायात्क
ल्प्यताम् अन्यथा गत्यनुपपत्तेः तेन अनुत्पत्ति प्रत्यवायस्यान्येन [illegible] ते संध्यामुपासते ये तु सततं संशितव्रताः विधूतपापास्ते यान्ति ब्र
ह्मलोकमनामयं एवं दद्यादहरहः श्राद्धमपि [illegible] तिमानहन्यहनि प्रीत्यात्मकमेव फलमश्रुत [illegible] पितृप्रीतिः कथं फलं व्यधिकरण
त्वादिति वाच्यं गयाश्राद्धादावि वउद्देश्यत्वसंबंधेनेव फलजनकत्वस्य [illegible] विकल्पनात् [illegible] शास्त्रदर्शितफलं मनुष्यातिरि
क्तस्तु सर्वोऽपि पितॄणामुक्तत्वे तु स्वस्यैव ग्रादिफलं प्राप्तं नित्यनैमित्तिकानुष्ठानस्य पापानाश्यतः स्वर्गजनकत्वात् पंडापूर्वापे प्रवृत्तिः [illegible] संभ
भवति न हि तत्सुखदुःखाभाववत्त्वतः पुरुषार्थः नवात्तत्साधनं प्रत्यवायजन्यलोक [illegible] भवतीति चेत् इत्थं यथा हि निसेकांतेन [illegible]

२३

बाधक वौद्धत्व मुसगी यम २
पाघ १

निन्द्यनिषिद्ध इष्टफलताद्य २

प्रवृत्तौ [illegible]
[illegible]

६०

ज्ञानत्वेनैवहेतुत्वमस्तु बलवदनिष्टाननुबंधित्वं च [illegible] नाम शीयकादुःसाध्ये दुःखाजनकत्वं बलवद्दुःखविषयदुःखाजनकत्वे वेति चेन्न इष्टसा

धनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात् साध्यत्वसाधनत्वयोर्विरोधात् अपि इष्टसाधनत्वं साध्यत्वे सिद्धत्वं च साधनत्वं न चैकमेकेनैकदा सिद्ध

मसिद्धं चेति ज्ञायते तस्मात्कालभेदात् उभयं ज्ञायते [illegible] बलवदनिष्टाननुबंधीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वा

त् न च साध्यत्वसाधनत्वयोर्विरोधः यदा कदाचित्साध्यत्वसाधनत्वयोरविरोधात् एकदा साध्यत्वसाधनत्वयोरज्ञानात् न चास्तु भेदे [illegible] ति

साध्यमिति ज्ञानं न प्रवर्तकं अनागतस्य ज्ञातुमशक्यत्वात् किंतु यादृशस्य पुंसः कृतिसाध्यं यद्दृष्टं तादृशत्वं स्वस्य प्रतिसंधाय तत्र प्रवर्तते ने

तेनौदनकामस्य तत्साधनताज्ञानं बलवत्त्वं स्वादि उपकरणवत्तः पाकः कृतिसाध्यः तादृशश्चाहमिति प्रतिसंधाय पाके प्रवर्तते तदुक्तमाहुः न

न स्वकल्पित लिप्यादि प्रवृत्तौ यौवने [illegible] तदभावात् [illegible] इदानीं [illegible] साधनत्वादिज्ञानं प्रवर्तकत्वे यभा

यो वि [illegible] वा [illegible] प्रवृत्तिः इदानीं कृतिसाध्यत्वाज्ञानात् [illegible] इदानीमिष्टसाधनत्वाज्ञानात् प्रवर्तते ८ तने

चैत्र [illegible] इदानीं बलवदनिष्टाननुबंधित्व [illegible] ज्ञानात् न चास्तिकस्य [illegible] प्रवृत्तो कथं च

बलवदनिष्टाननुबंधित्वबुद्धिर्नरकसाधनत्वज्ञानादिति [illegible] नरकसाधनता [illegible] तिरोधानात् [illegible] कृतिसा

ध्यताज्ञानाभावात् न चिकीर्षाप्रवृत्ति [illegible] इष्टसाधनताज्ञानात् [illegible] मतं [illegible] प्रवृत्तिः [illegible] साध्यमाणपंच

हरा हरि पीर नं

ज्ञान ... यि यथेष्टाभिप्रायः स्वेष्टसाधनत्तत्यानित्यत्व ... | सि तु [illegible] यागादि ... नरकेष्टानवच्छेदाइष्टसाधनताबोधकसाधिविधिरतो नाहं वादिप्रयुक्तः स्वर्गकामो यागेन
स्वर्गकामस्य कालन्वयनिष्ठानन्वयानि इष्टसाधनं न त्विति तात्पर्यमर्था । २

६१

त्वेपि अग्निमपापं प्रति साधायसंतोन वर्त्तते इत्याहुः आचार्यास्तु आज्ञाभिप्रायो विध्यर्थः पाकं कुर्या इत्यादावाज्ञादिरूपे [illegible] वाचित्वात् लिङ्भा
त्रस्य इष्टवाचित्वं लाघवात् एवं च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामकृतिसाध्यत्वमात्राभिप्रेतः इत्यर्थः ततश्चाभीष्टत्वेन इष्टसाधनत्वादिकमनुमा
य प्रवर्त्तते न कल्पनं भक्षणे तदभावान्न प्रवर्त्तते यत्तु वेदपौरुषेयत्वं नाभ्युपैति तं प्रति विधिरेव तावत् धर्मे न श्रुतिर्न्यायाः पुंयोगोमानं च वक्तुरस्मर
णं वा धर्मकं कपिलकणादादिभिरद्यपर्यंतं कर्तृस्मरणस्यैव प्रतीयमानत्वात् अन्यथा स्मृतीनामप्यकर्तृत्वापत्तेः तत्रैव कर्तृस्मरणमस्तीति चे
द्वेदेपि छंदांसि जज्ञिरे तस्मादित्यादि कर्तृस्मरणमस्त्येव एतेन प्रतिमन्वंतरं चैषा श्रुतिरन्या विधीयते इत्यपि द्रष्टव्यं स्वयंभूरेष भगवान्वेदो
गीतस्त्वया पुरा शिवादि ऋषिपर्यंता स्मर्तारोस्य न कारकाः इति तु वेदस्य स्तुतिमात्रं न चायं रूपमले भ्रमादिसंभवात् अप्रामाण्यं स्यादिति वाच्यं नि
त्यसर्वज्ञत्वेन निर्दोषित्वात् अत एव पुरुषांतरस्य भ्रमादिसंभवान्न कपिलादेरपि कर्तृत्वं वेदस्य किं च वर्णानामेवानित्यत्वस्य प्रमाणत्वात्सुतरां
मासं शब्दस्य वेदस्यानित्यत्वमिति सिद्धेयः उपादानस्य चाध्यक्षत्वं प्रवृत्तौ जनकं भवेत् निवृत्तिस्तु भवेद्द्वेषाद्विष्टसाधनताधियः उपादानस्य समवायिका
रणस्य प्रत्यक्षं प्रवृत्तौ कारणमिति निवृत्तिरिति द्विष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्तिं प्रति जनकत्वमन्वयव्यतिरेकाभ्यामवधारि
त मितिभावः यत्नो जीवनयोनिस्तु सर्वदातींद्रियो भवेत् यत्न इति जीवनयोनियत्नो यानुजीवनमनुवर्त्तते स चातींद्रियः तत्र प्रमाणमाह शरीरे प्रा
णसंचारकारणं तस्य कीर्तितं शरीर इति प्राणसंचारो हि प्रयत्नसाध्यः ईदृशं च प्राणसंचारस्य सर्वस्य यत्नसाध्यत्वानुमानात् प्रयत्नमतस्य वा

२६

नित्यसर्ववि
भावकज्ञानव
त्वेन ... ७

२ नो५

भावास्तिष्ठति तदभावे तदभावः एवं प्रत्यवायाभावसंसर्गे दुःखप्रागभावस्य तत्तदभावेन तदभावे नियोगस्येमेसाधारणकारणताया दुःख
प्रागभावं प्रत्यपि सत्त्वाच्च वात एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थं रूपं नञर्थान्वयः
इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च विध्यर्थः किं तु बल
वदनिष्टाननुबन्धित्वमात्रं तदभावश्च नञा बोध्यते अथ बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वसति कृतिसाध्यत्वं विध्यर्थः
तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यतीति ननु श्येनेनाभिचरन्यजेतेत्यादावप्येवं तत्र बलवदनिष्टान
नुबन्धित्वमर्थः श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात् न च वैधत्वात् न निषेध इति वाच्यं अभिचारे प्रायश्चित्तोपदे
शात् न च मरणानुकूलव्यापारमात्रं यदि हिंसा तदा खड्गकारस्य कूपकर्तुश्च हिंसकत्वापत्तिः गरलस्य नाभिचारजन्यमरणे आत्मवधत्वा
पत्तिश्च विनाऽन्यमरणोद्देश्यकत्वस्यापि विशेषणत्वात् अन्योद्देश्यकत्वे सति नाशे च हतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न श्येनवा
रणाय दण्डाहारकत्वेन विशेषणत्वात् अत एव कामो मरणार्थकः तद्विषये दर्शनेन हिंसात्वेन चण्डालजनकस्य विहिंसात्वे सत्तु न तथा
किं तु [illegible] न्यापत्त्यमिति वाच्यं खड्गाघातेन ब्राह्मणे व्रणपाकपरम्परया मृते तु हिंसात्वात् मतेः
केचित्तु श्येनस्य हिंसाफलं न तु मरणं तेन श्येनजन्यखड्गाघातादिरूपा हिंसा अभिचारपदार्थः स च पापजनकः अतः श्येनस्य वैधत्वात् पापाजनक

जयकृ सू.
लि. मु. जी
६३

ज्ञः॥ क्वचित् कर्मजवेगजश्शब्दोत्तो द्विविधः तत्राद्यः शरीरे चेतोदनाज्ञनितेन कर्मणा वेगो जन्यते तेन च पूर्वकर्मनाशस्ततस्तत्तरं कर्म एवमग्रे
पि विनाश्च वेगो कर्मणः कर्मप्रतिबंधकत्वात्पूर्वकर्मनाशस्ततरकर्मोत्पत्तिश्च न स्यात् यत्र च वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो
वेगः स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि अतीन्द्रियोसौ विज्ञेयः॥ क्वचित्स्पंदेपि कारणं स्थितिस्थापक इति आकृष्टशाखादीनां परि

९५

त्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात् केचिदिति चतुर्ष्वित्यादिर्मुख्यस्थितिस्थापकं केचिन्मन्यंते तत्र प्रमाणं रतिभावः असौ स्थितिस्थाप
कः॥ क्वचिदाक्षत्र पृथ्व्यादौ भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् भावनाख्य इति तस्य संस्कारः
स्योपेक्षात्मकज्ञानात्संस्कारानुत्पत्तेः उपेक्षानात्मकत्वमुक्तं तत्संशयात्संस्कारानुत्पत्तेर्निश्चयस्त्युक्तं तेनोपेक्षान्यनिश्चय त्वेन संस्कारं प्रतिहेतु
तेति भावः ननु स्मरणं प्रति उपेक्षान्यनिश्चयत्वेन हे [illegible] तुत्वं तेनोपेक्षादिस्थले न स्मरणं [illegible] इत्थं च संस्कारं प्रति ज्ञानत्वेनैव
हेतुतास्त्विति चेन्न विनिगमनाविरहेणापि संस्कारं प्रति उपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् किंच उपेक्षास्थले संस्कारकल्पनायां गुरुत्व
त्वात् संस्कारं प्रत्युपेक्षान्यत्वेन हेतुतायाः सिद्धत्वात् स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते असौ संस्कारः तत्र प्रमाणं दर्शयति स्मरणे इति य
तः कारणं प्रत्यभिज्ञानं च जनयति अतः संस्कारः कल्प्यते विना व्यापारं पूर्वानुभवस्य स्मरणजननासामर्थ्यात् स्वस्वव्यापारान्यतराभावकार
णत्वासंभवात् ननु प्रत्यभिज्ञां प्रति तत्संस्कारस्य हेतुत्वेन प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यं अप्रयोजकत्वात् परे

जै २

धाञ्चातीन्द्रियमस्त्र सिद्धः शब्दजीवनयोर्निर्मलः गुरुत्वं निरूपयति अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तत् अनित्ये तदनित्यं स्यान्नित्ये नित्य
मुदाहृतं तदेवासमवायि स्यात्पतनाख्येतु कर्मणि अतीन्द्रियमिति अनित्ये द्व्यणुकादौ तद्गुरुत्वमनित्यं नित्यपरमाणौ नित्यं गुरुत्वमित्यनुवर्त्तते तद्गु
रुत्वमसमवायिकारणं पतनाख्ये इति आद्यपतनेत्यर्थः द्रवत्वं निरूपयति सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथापरं सांसिद्धिकं तु सलिले द्वितीयं क्षि
तितेजसोः सांसिद्धिकमिति द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकं चेत्यर्थः द्वितीयं नैमित्तिकं परमाणौ तज्जले नित्यमन्यत्रानित्यमिष्यते परमाणाविति
जलपरमाणौ द्रवत्वं नित्यमित्यर्थः अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यं नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु वह्नि
इति अग्निसंयोगजन्यं नैमित्तिकं द्रवत्वं तच्च सुवर्णादिरूपे तेजसि घृतजतुप्रभृतिपृथिव्यां च वर्त्तत इत्यर्थः द्रवत्वं स्यंदनहेतुर्निमित्तं संग्रहे तु तत्
[illegible] हेतुरिति असमवायिकारणमित्यर्थः संग्रहे सक्तुकादिसंयोगविशेषे तद्द्रवत्वं स्नेहसहितमिति बोध्यं तेन द्रुतसुवर्णादि
नासंग्रहः स्नेहं निरूपयति स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ जले इति जले एवेत्यर्थः असौ स्नेहः ननु पृथिव्यामपि तैले स्नेह उपल
भ्यते न चासौ जलीयस्तस्यासत्त्विदंहनत्वानिकूल्यप्रसंगात् अत आह तैलांतरे तत्प्रकर्षाद्दहनस्यानुकूलता तैलांतरे इति तत्प्रकर्षात्स्नेहप्रकर्षा
त् तैले जले उपलभ्यमानः स्नेहोपि जलीय एव तस्य प्रकृष्टत्वाद्दहनानुकूल्यं अपकृष्टस्नेहे हि जलं वह्निं विनाशयतीति भावः संस्कारं निरूपयति संस्का
रभेदो वेगोथ स्थितिस्थापकभावने संस्कारभेद इति वेगस्थितिस्थापकभावनाभेदात्संस्कारस्त्रिविध इत्यर्थः मूर्त्तमात्रे तु वेगः स्यात्कर्मजो वेग

कण्व
सि. मु. ली.

६२

नस्यात्तदाम्नायप्रतिपादितानाशफलेन स्यात् महितेन न चेत्तद्गनादीनां नाशः प्रतिबंधो वाविभातुं शक्यते नस्य पूर्वमेनत्तत्त्वादितिभावः जीवेति
ईश्वरस्य धर्माधर्माभावादितिभावः … इमोतु वासनाजन्योऽज्ञानाद्यपि विनश्यतः इमो धर्माधर्मौ नाशनेति अतोऽज्ञाननिवृत्तिरपि
सुकृतदुष्कृतनर्कसंपत्तिन फलायालमितिभावः अज्ञानादपीत्यपिना भोगपरिग्रहः नतु तत्त्वज्ञानस्य कार्यं धर्माधर्मनाशकत्वेनाभ्युक्तं दीयते
कर्म कल्पकोटिशतैरपि इतिवचनविरोधात् इत्थं च तत्त्वज्ञानिनां झटिति वाय्वहे न सकलकर्मणां भोगेन क्षयः तत्र भोगस्य नेद
दाधितनाशकोपलक्षकत्वात् कथमन्यथा प्रायश्चित्तादिना कर्मणां नाशः तदुक्तं ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति दीयते

२६

वास्य कर्माणि तस्मिन् दृष्टे परावरे इति ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादिकं च न स्यात् ज्ञानेन सर्वेषां कर्मणां नाशादिति
चेन्न प्रारब्धेतरकर्मणामेव नाशात् तच्छरीरभोगजनकं हि यत्कर्म तत्प्रारब्धं तदभिप्रायमेव नाभुक्तं क्षीयते इति वचनमिति शब्दं निरूपयति
ति शब्दो ध्वनिश्च वर्णश्च मृदंगादिभवो ध्वनिः कंठसंयोगादिजन्या वर्णास्ते कादयो मताः सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते
वीचीतरंगन्यायेन तदुत्पत्तिस्तु कीर्तिता शब्द इति नभोवृत्तिः आकाशसमवेतः दूरस्थशब्दस्याग्रहणादाह श्रोत्रेति ननु मृदंगाद्यवच्छेदेनोत्प
न्नेशब्दे श्रोत्रे कथमुत्पत्तिरत आह वीचीति आद्यशब्दस्य बहिर्देशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन जन्यते तेन चापरस्तत्सापेक्षः
एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति कदंबगोलकन्यायादुत्पत्तिः कस्यचिन्मते कदंबेति आद्यशब्दाद्दशदिक्षु दशशब्दा उत्पद्यंते ते च अन्या

त्वनुद्बुद्धसंस्कारात्प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्यत्वे तु स्वापेक्षयानन्तरक्षणस्यप्रत्यभिज्ञायानिहेतुत्वं कल्प्यते इत्याहुः ॥ अदृष्टं निरूपयति
धर्माधर्मौ च ॥ स्वर्गसाधनमिति स्वर्गादिकारणं स्वर्गादीति स्वर्गादि सकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्मः इत्यर्थः तत्र प्रमाणं
दर्शयितुमाह या ॥ गादिर्गतेनाव्यापारास्वनुत्पत्तिनः आगामिव्यापारस्तथा च धर्मः कल्प्यते अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारत
या च कालान्तरभाविस्वर्गजनकत्वं न स्यात् तदुक्तमाचार्यैः चिरध्वस्तं फलायालं न कर्मातिशयं विनेति ननु यागध्वंस एव व्यापारः स्यात् न च प्रतियो-
गितया ध्वंसस्यैरकत्वाजनकत्वं सर्वदैव तत्फलानामापात् न च वन्नांतफलानन्तरमन्त्येन्यचरमफलस्य ध्वंसनाशकत्वात् तथात्वमिति वाच्यं कम
लविशेषस्य सहकारित्वात् अत एवाह गंगास्नानेति गंगास्नानस्य हि स्वर्गजनकत्वेनेतानां जलसंयोगध्वंसानां व्यापारत्वमपेक्षैकममूर्तेने
यकल्पनेन लाघवादिति भावः ननु ध्वंसो पि न व्यापारः स्तु न च निर्व्यापारस्य चिरध्वंस्तस्य कारणत्वमिति वाच्यं अनन्यथासिद्धनियतपू-
र्ववर्तित्वस्य तत्रापि सत्वात् अव्यवहितत्वं न वर्तित्वे हि चक्रुः संयोगादेः कारणत्वेन तु सर्वत्र कार्यकालवृत्तित्वनियमस्य व्यभिचारणास्यकार-
णत्वे इत्यत आह कर्मनाशाजलस्पर्शादिना नाश्यत्वात् सोमतः यदि हि अपूर्वं न स्यात्तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यान्न
हि तत्र यागादेर्नाशः जतिं ध्वंसो वा नाशयितुं शक्यते तस्य ध्वंसैकव्यत्वादिति ॥ अधर्मो नरकादीनां हेतुर्निषिद्धकर्मजन्यः ॥ नरकादि सकलदुःखा-
नां नारकीयशरीरादीनां च साधनमधर्म इत्यर्थः तत्र प्रमाणमाह प्रायश्चित्तादिनाश्योऽसौ जीवनवृत्तीविशेषगुणौ प्रायश्चित्तेति प्रदिष्टाधर्मो

नेदशब्दाद्वाक्यार्थं तेइतिभावः अभिकालेन स्यनागोरवात् उक्तं कस्यचिन्मतेइति ननुशब्दस्य नित्यत्वादुत्पत्तिकथनमसंगतमत आह उत्पन्न
श्चो विनष्टः स इति बुद्धिरनित्यता इत्यत्र लिपि शब्दो मुत्पादविनाशशालित्वादनित्यत्वमित्यर्थः ननु स एवायं ककारः इत्यादि प्रत्यभिज्ञाना
च्छब्दानां नित्यत्वं ईत्थं चोत्पादविनाशबुद्धिर्भ्रम एवेत्यत आह सोऽयं ककार इति बुद्धिस्तु साजात्यमवलंबते मिति साजात्यमिति तत्र प्रत्यभि
ज्ञानस्य तत्सजातीयत्वं विषयो न तु तदात्मभेदो विषयः उक्त प्रतीतिविरोधात् इत्थं च द्वयोरपि प्रतीत्योरभ्रमत्वमिति ननु सजातीये सोपमिति तत्र भस
भिज्ञा कुत्र दृष्टा इत्यत आह तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् तस्मादनित्या एव वर्णाः सर्वेषां मतं हि नः तेदेवेति पदेनौषधमन्येन कृतं तदौषधं
मयापि कृतमित्यादि दर्शनादिति भावः इति श्री महोपाध्याय न्यायविद्यानिवासभट्टाचार्यपुत्र श्रीयुत विश्वनाथ पंचानन भट्टाचार्य विरचिता सिद्धां
तमुक्तावली समाप्ता ❀ ५ ❀ श्रीरस्तु ❀ ५ ❀ श्रीकांत ० ५ ०

सिद्धान्त मुक्तावलि पत्र ६४

गाथ ग्रंथ